श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री सौम्यनारायणदासेन कृतम्

# ॥ श्रीरङ्गरामानुजमहादेशिक (श्रीमुष्णम् आण्डवन्) मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गरामानुजमहादेशिक (श्रीमुष्णम् आण्डवन्) मङ्गळम् ॥

नमस्तस्मै नमो रङ्गरामानुजाय योगिने।
श्रीमद्वेदान्तरामानुजात्त सार्वज्ञ शालिने ॥ 1 ॥

पूर्वाचार्यकृपापूर्णपात्राय परमात्मने।
भूवराहवरक्षेत्रे ह्यवतीर्णाय मङ्गलम् ॥ 2 ॥

भारद्वाजकुलोत्तीर्ण भाष्यकारमतानुग।
भूवराहकृपापात्र भूयतैवास्तु मङ्गलम् ॥ 3 ॥

साहित्य एवं सङ्गीते शिल्पशास्त्रादिके तथा।
विख्यातवैभवो यश्च तस्मै प्राज्ञाय मङ्गलम् ॥ 4 ॥

नानातन्त्रस्वतन्त्राय नानाशास्त्रविनोदिने।
मानातीताय मुनये मान्यदायास्तु मङ्गलम् ॥ 5 ॥

वेदशीर्षमुनिप्राप्त वेदान्तज्ञानशालिने।
वेदान्तरक्षकायास्तु तस्मै श्रेष्ठाय मङ्गलम् ॥ 6 ॥

पाञ्चरात्रप्रतिष्ठात्रे परिव्राजकभूभृते।
प्रपन्नार्तिप्रहाराय प्रवक्त्रे तेऽस्तु मङ्गलम् ॥ 7 ॥

सकलागमतन्त्रादि सर्वशास्त्ररताय च।
तर्कशास्त्रबुधार्काय तस्मै सेव्याय मङ्गलम् ॥ 8 ॥

अखण्डमण्डलोद्भूतपण्डितैर्मण्डिताय च।
पाषण्डद्रुमषण्डादिखण्डकायास्तु मङ्गलम्॥ **9** ॥

पामरानपि लोकेषु प्रपन्नीकृतयोगिने।
तस्मै परावराविद्याभास्करायास्तु मङ्गलम्॥ **10** ॥

वेदान्तलक्ष्मणयतेः ख्याता ये ये मनोरथाः।
प्रकृष्टाः पूरिता येन तस्मै बहुलमङ्गलम्॥ **11** ॥

श्रीमद्रङ्गयतीन्द्राख्यमुनेः रञ्जकमङ्गलम्।
सौम्यनारायणेनोक्तं पठतां मङ्गलाप्तये॥ **12** ॥

॥ इति श्रीरङ्गरामानुजमहादेशिक मङ्गळं समाप्तम्॥